# Vasavidevi Devotional Garlands in 72 Melakarta Ragas

# द्विसप्ततिः ७२ मेलकर्ता रागयुक्त वासवीदेवी भक्तिपुष्पाञ्जलिः

## Document Information

Text title : Vasavidevi Devotional Garlands in 72 Melakarta Ragas

File name : melakartArAgavAsavI.itx

Category : devii, devI, kRitI

Location : doc_devii

Author : Rajeshwari Govindraj (Copyrighted)

Transliterated by : Rajeshwari Govindraj rajeswari dot govindraj at yahoo dot com

Proofread by : Rajeshwari Govindraj rajeswari dot govindraj at yahoo dot com

Latest update : December 30, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# द्विसप्ततिः ७२ मेलकर्ता रागयुक्त वासवीदेवी भक्तिपुष्पाञ्जलिः

## १ शुद्ध मध्यम इन्दुचक्र

### १ राग कनकाङ्गि

“कनकाङ्गि” कन्यके कोमलाङ्गि
भव सुप्रसन्ना शोभनाङ्गि ॥ पल्लवि॥

आर्षधर्म पालिनि पेनुगोण्डपुराधीश्वरि
कुसुमाम्ब कुसुमगुप्त प्रियनन्दिनि
पराशक्तिरूपिणि गोलोकवासिनि
परतत्त्वबोधिनि परञ्ज्योति नमोऽस्तु ते ॥ १॥

अरविन्दलोचने अरविन्दवदने
अरविन्दनाभ भगिनि अरविन्दचरणे
स्वकुलधर्म रक्षिणि सुहासिनीमणि
सुनादविनोदिनि गीतसुधास्वादिनि ॥ २॥

### २ राग रत्नाङ्गि

ओङ्कार नादप्रिये “रत्नाङ्गि” रम्ये
ह्रीङ्कार मन्त्रानुसन्धान गम्ये ॥ पल्लवि॥

कर्तृतन्त्रोपासक कामितफलदे
वस्तुतन्त्र ज्ञानयोगि मुक्तिप्रदे
भूतभविष्यद् वर्तमानातीते
नतमस्तकोऽस्म्यहं परदेवते ॥ १॥

सदाचारनिष्ठ मनस्स्थिति कारिणि
मोहालस्य दीर्घसूत्रता दूरिणि
करणत्रय सामरस्य संप्रदायिनि
कर्मपथ विघ्ननाशिनि गीतसुधावनि ॥ २॥

## ३ राग गानमूर्ति

नवरसतरुमञ्जरी सर्वकलानिधीश्वरी
नाट्यमयूरी रक्षतु मां भुवनमनोहरी ॥ पल्लवि॥

भक्तिनर्तनशाले नृत्यति सद्भावाङ्कुरी
रक्तिराहित्य वरदाभयकरी तलोदरी
श्रीकन्यका परमेश्वरी नवनीतहृदयेश्वरि
ज्ञानपयोसागरी मां रक्षतु श्रीकरी ॥ १॥

शृङ्गार करुण वीर हास्य भयानक
अद्भुत बीभत्स रौद्र शान्तेति नवरसाः
सर्वजीव चित्तप्रासाद नित्यवासाः
सुखदुःख फलानुभवे सत्यशोधनरताः ॥ २॥

तुम्बुरु नारदादि “गानमूर्ति”वृन्द वेष्टिता
सिद्ध साध्य देवर्षि राजर्षि गण समुपासिता
गीतसुधावर्णिता सुप्रसन्ना भवतु
कृपया मां सदा दीनं रक्षतु संरक्षतु ॥ ३॥

## ४ राग वनस्पति

संरक्षतु विश्वमिदं सर्वजीव हितकारिणी
सर्वजन सुखकामिनी धर्मकर्म स्वामिनी ॥ पल्लवि॥

कन्यका परमेश्वरी श्रीराजराजेश्वरी
कारुण्य “वनस्पति” सुगन्ध लेपनानन्दकरी
कोऽ स्ति तया विना तप्ताभयकरी
सर्वकालाश्रया गीतसुधानन्दकरी ॥ १॥

आदि व्याधि पीडित मर्त्य जिवोद्धारिणी

कलह कदनकामी पीडित शिष्टसंरक्षिणी
भूकम्प प्रवाहातिवर्षाऽवर्षादि
धारुणप्रकृति विकोपाशु नियन्त्रिणी ॥ २॥

सा महादेवी विश्वमातापिता
सा महालक्ष्मी विश्वदातात्राता
सा महासरस्वती सृष्टिरक्षिणी
कथं भवति सा जीवनाशिनि ॥ २॥

## ५ राग मानवति

अमोघ त्यागान्वित यज्ञविदायिनि
“मानवति” महनीये कुसुमाम्ब नन्दिनि ॥ पल्लवि॥

नमोऽस्तु ते ज्ञानयोगेश्वरि
नमोऽस्तु ते राजयोगेश्वरि
नमोऽस्तु ते कन्यका परमेश्वरि
नमोऽस्तु ते गीतसुधासागरि ॥ १॥

पद्मशयन साम्राज्याधीशेन
विष्णुवर्धन निरङ्कुशत्व दुरितेण
आत्मबलिदान यागदीक्षाव्रते
स्वबान्धवानुसृते मुक्तिदाते ॥ २॥

## ६ राग तानरूपि

परिपालय मां वासवि कन्यके
“तानरूपि” भक्तिगान माधुर्य रसिके ॥ पल्लवि॥

अमृतांशु सहस्रबिम्ब द्युतिमयि
जन्मरोग भिषजोत्तमे श्रीमयि
आदिमध्यान्त रहिते दानप्रीते
वैश्यवंश सञ्जाते यज्ञतपोभाविते ॥ १॥

शास्त्रनियम पालिनि शास्त्रसंरक्षणि
धर्मबुद्धि प्रकाशिनि रागद्वेष दूरिणि

शक्ति भुक्ति दायिनि गीतसुधातरङ्गिणि
परब्रह्मरूपिणि मोक्षप्रसादिनि ॥ २॥

अनन्यभक्ति क्षिप्रवश्ये ब्रह्माण्डनिलये
योगिजन पर्युपास्ये योगमाये
द्वन्द्वजाल प्रदर्शिनि असङ्गास्त्र दायिनि
भक्तजन योगक्षेम नित्यवहन हर्षिणि ॥ ३॥

## २ शुद्ध मध्यम नेत्रचक्र

## ७ राग सेनापति

प्रणमामि कन्यका परमेश्वरीं
प्रपञ्चमातृकां सौन्दर्यसागरीम् ॥ पल्लऽवि ॥

राजर्षि गानर्षि समुपाश्रितां
ब्रह्मर्षि देवर्षि समुपासितां
प्रणवनादमयीं गीतसुधामयीं
अव्याज दयामयीं ज्योतिर्मयीम् ॥ १॥

बालरवि कोटिप्रभां स्वयम्प्रभां
पालित जीवकोटिशुभां प्रतिभां
अहिंसात्यागयोग पथगामिनीं
विष्णुवर्धन “सेनापति” परिवर्तीनीम्म् ॥ २॥

## ८ राग हनुमतोडि

चिन्तामणि प्रासादनिवासिनि जीवपावनि
चिन्तायातना दूरिणि रक्ष अस्मान् लोकजननि ॥ पल्लवि॥

अप्रमेये महामाये निर्माये निर्भये
प्रमोदालये विज्ञाननिलये सत्याश्रये
“हनुमतोडि” रागालापन प्रोल्लासिनि
परञ्ज्योति देवि कलियुग धर्म प्रबोधिनि ॥ १॥

अनुदिनकृत वाक्काय मानसदोषानि
शान्त्यहिंसा मार्गेणैकेन परिवर्तनीयाणि
इत्यचल निर्णये त्वमेव सञ्जाते पराशक्ति निरञ्जनि
श्रीमद्कन्यका परमेश्वरि गीतसुधासञ्जीविनि ॥ २॥

## ९ रागं धेनुक

कारुण्य चन्द्रिके श्री वासवाम्बिके
योगिराजमानस राजहंसिके ॥ पल्लवि॥

पञ्चमहाभूतात्मक विश्वसाक्षिणि
आकाशानिलानल सलिलधरारूपिणि
पञ्चविषय गुणात्मक जगद्व्यापिनि
शब्द् स्पर्शरूपरस गन्धरूपिणि ॥ १॥

आकाशरूपिणि शब्दगुणधारिणि
अनिलरूपिणि स्पर्शगुणधारिणि
अनलरूपिणि रूपगुणधारिणि
सलिलरूपिणि रसगुणधारिणि ॥ २॥

पृथ्वीरूपिणि गन्धगुणधारिणि
सच्चिद्रूपिणि गीतसुधारागिणि
लोककण्टक “धेनुक” भञ्जनभगिनि
लोकत्रयस्वामिनि अहिंसामोदिनि ॥ ३॥

## १० राग नाटकप्रिय

वासवि वरदे सर्वशास्त्र विशारदे
भव मम मोददे सर्वकला कोविदे ॥ पल्लवि॥

राग तान शृति लयलीनता मोदिनि
हाव भाव भङ्गि मुद्रा युक्त लास्यरञ्जनि
प्रमोद तरङ्गिणि प्रमाद निवारिणि
परापरा विद्यास्वामिनि जननि ॥ १॥

काव्य साहित्य “नाटकप्रिय” रसिके

आराधयामि गीतसुधा नायिके
ज्ञानयज्ञव्रत प्राज्ञमेधाङ्कुरि
योगनिरत चित्तप्रसादनकरि ॥ २॥

## ११ राग कोकिलप्रिय

त्यागपथं गमय मां शुकपाणि
शुक “कोकिलप्रिय” कूजनास्वादिनि ॥ पल्लवि॥

आध्यात्मिक तापदूरिणि निर्माये
अधिभौतिक तापहारिणि योगमाये
अधिदैविक तापवारिणि स्थितिप्रिये
तापत्रयाग्नि जिह्वाशमनप्रिये ॥ १॥

कर्मप्रचोदिनि त्रिवासनाकारिणि
देहवासनारूपेण विषय चक्रावर्तिनि
लोकवासनारूपेण भयकामवर्धिनि
शास्त्रवासना द्वारा भेदाभेदप्रबोधिनि ॥ २॥

अहिंसामयि दयामयि प्रेममयि
त्यागमयि विरागमयि चिन्मयि
श्रीसरस्वति श्री हैमवति श्रीहरिसतिरूपिणि
श्रीमति सद्गुणवति शुभमति गीतसुधावाहिनि ॥ ३॥

## १२ राग रूपवति

हे “रूपवति” तव लावण्ये स्तब्धोऽस्मि
तव गुणमाधुर्ये भगवति मूकोऽस्मि ॥ पल्लवि॥

लोकोत्तर महिमाशक्ति सम्पद्युते
दिव्य ज्ञानशक्तिपूर्ण लीलायुते
राजसिक तामसिक भावविकृति हारिणि
सात्विक भावोद्दीपनकर स्पर्शमणि ॥ १॥

हे गीतसुधाकरि भव कृपासागरि
श्रीमद्वासवी देवी हृदयेश्वरि

जीवपरीक्षा कारिणि उत्कर्षिणि
जन्मसाफल्य बलप्रदायिनि ॥ २॥

## ३ शुद्ध मध्यम अग्निचक्र

## १३ राग गायकप्रिय

निर्मलां निष्कलां सर्वमङ्गलां
श्रित वत्सलां ध्यायामि वासवि बालाम् ॥ पल्लवि॥

नित्य महोज्ज्वलां निरुपमबलां
दर्पण सदृशकपोलां निखिलां
नृत्यकाव्याभिनयलीलां सुशीलां
वादक “गायकप्रिय” पोषणलोलाम् ॥ १॥

साधन निरत योगिगम्य चित्कलां
संस्कार वशवर्ति गीतसुधात्मफलां
चतुर्विंशत्यक्षर मालां निर्मलां
जीवकोटि सृष्टिपालन कुशलाम् ॥ २॥

## १४ राग वकुलाभरण

अतिशय भक्तिदाते वासवि विश्वमाते
शुकहस्ते नमस्ते तुलाहस्ते विद्याप्रीते ॥ पल्लवि॥

तव पुण्यचरण रजस्पर्शमेव करोति मां पुनीतं
तव दिव्य नामजपमेव करोति मां वाचालं मौनीं
तव सुरगीतसुधा पानमेव पङ्गुं गिरिं लङ्घयते
तव निरुपम चरिताद्भुतमेव नेत्रोन्मीलनं कुरुते ॥ १॥

मा कुरु मां तव सान्निध्य सामीप्य दूरं
मा कुरु मां तव नामरत्नहाररहितं
कुरु मां तव नित्यमहिमा वैभवरतं
कुरु मां सदा भक्तिनिर्मग्न भावमधुपूतम् ॥ २॥

“वकुलाभरण”धारिणि सहज सुन्दर मानिनीमणि
नलिन कुण्डल धारिणि नागवेणि कोकिलवाणि
अरुणवारिजपाणि दयापूर्ण तेजोनयनि
वैश्यवंश कीर्तिकारिणि कामितार्थ दायिनि ॥ ३॥

## १५ राग मायामालव गौल

ज्येष्ठशैल पुराधीश कुमारि सुकुमारि
श्रेष्ठ गुणाभरणधरि सुन्दरशुकधरि ॥ पल्लवि॥

गौरवबालिका वृन्दस्वामिनि मार्गदर्शिनि
ग्रन्थाध्ययन प्रमोद भाग्यप्रसादिनि
ऊरुजान्वयकुल दैवी राजकुमारि
पराशक्त्यवतारिणि विश्वैकसुन्दरि
वर्णनातीत गुणशक्ति विद्यासिद्धि स्वामिनि
वासवी कन्यका परमेश्वरि स्नेहचिन्तामणि
वर्णाश्रम विदायिनि ऊरुजान्वय हितकरि
वीर धीर विरूपाक्ष वात्सल्यसागरि ॥ २॥

सुलभग्राह्य “मायामालवगौल”सप्तस्वरजननि
भजन सङ्कीर्तनप्रिय स्वेदाश्रु प्रोल्लासिनि
युगयुगसञ्चालिनि भक्तिगीतसुधा वाहिनि
योगक्षेमसंवहनि शुद्ध बुद्ध मुक्तरूपिणि ॥ ३॥

## १६ राग चक्रवाक

तपोगोचरी समाधीश्वरी
कन्यकापरमेश्वरी अवतु माम् ॥ पल्लवि॥

वाग्रूपसृष्टि सारा चतुर्वेदरूपिणि
चतुर्वेदसारा त्रिव्याहृतिरूपिणी
भूर्भुवस्सुवसारा ओङ्काररूपिणी
ओङ्कारसारा अकाररूपिणी ॥ १॥

आदिक्षान्त वर्णनकरी शुभकरी

सर्वभाषा रत्नाकरी अवतु मां
सहृदय पीयूषाभिवर्षिणी
शुक पिक “चक्रवाक” कूजनहर्षिणी ॥ २॥

चतुर्दश भुवनाकारा मधुरा
ध्यानयोग तत्परा निर्विकारा
सर्वाधारा अवतु सदा मां
गीतसुधाहृत्पद्मे साकारा ॥ ३॥

## १७ राग सूर्यकान्त

तव समक्षमताभ्यास सौभाग्यं मे देहि
तव समुज्ज्वल अहिंसायागे श्रद्धां मे देहि ॥ पल्लवि॥

तव विस्मरण समये तु मायावशोऽहं
तव संस्मरण समये तु ज्ञानदीप्तोऽहं
भवबन्धहारिणि त्वयैव वेद्यम् ।
मम चित्तसंस्करणं त्वयैव साध्यम् ॥ १॥

कोटिकोटि जीवि जननमरणचक्र सञ्चालिनि
कोटिकोटि कर्म कलाप ताप विलाप साक्षिणी
श्रीकन्यका परमेश्वरि सद्गतिकारिणि जननि
गौरव बालिकामणि दुरितवारिणि गीतसुधावनि ॥ २॥

“सूर्यकान्तशिला” सदृशं धीतेजं मे प्रयच्छ
चन्द्रकान्ति सदृशं शीतल चित्तं मे प्रयच्छ
शान्ति सौख्य भक्ति ज्ञान वैराग्य प्रदायिनि
भ्रान्ति शोक मोह ममताहङ्कार नाशिनि ॥ ३॥

## १८ राग हाटकाम्बरि

जिज्ञासारण्ये मम दिङ्मूढता हास्यास्पदं
कृपासागरि “हाटकाम्बरि” कथं लभ्यं तवपदम् ॥ पल्लवि॥

विषमे आगतमिदं दौर्भाग्यं पुराकृतं
व्यर्थाश्रुधाराकुल नेत्रं मां कुरु जागरितं

अदम्योत्साहोद्याने पुष्पसञ्चयरतोऽस्मि
सौरभमय भक्तिसुम मालिकार्पणे तृप्तोऽस्मि ॥ १॥

क्षिप्तता विक्षिप्तता सम्मूढता पीडितोऽस्मि
एकाग्रता निरोधता स्थितिद्वयाश्रय निरीक्षकोऽस्मि
त्वमेव योगेश्वरि गीतसुधाकरि शुभोदयकरि
समाधिऋषि कुसुमश्रेष्टि सुकुमारि पेनुगोण्डेश्वरि ॥ २॥

## ४ शुद्ध मध्यम वेदचक्र

## १९ राग झङ्कारध्वनि

अन्तरतम गुरुरूपेण बोधय शृतिमर्मज्ञानं
अन्तर्यामिनि क्षमस्व मम अज्ञानकृत पापम् ॥ पल्लवि॥

हे पुण्यचरिते “झङ्कारध्वनि” प्रीते गुणातीते
कुबेरांशज कुलसञ्जाते वासवि विश्वमाते
नाद बिन्दु कलातीते सर्वावस्था विवर्जिते
नागरान्वयाराधिते ज्येष्ठशैलपुरजनप्रीते ॥ १॥

क्षमस्व क्षमस्व मम विभ्रान्तिकृत अपराध सहस्राणि
क्षमस्व कृपया मम विकृत भावलहरि सहस्राणि
क्षमस्व सर्वदा मम निद्राजडताविरति दोषाणि
क्षमस्व निर्माये गीतसुधान्तर् दुरितानि सहस्राणि ॥ २॥

## २० राग नटभैरवि

वैश्यवंशोद्धारिणि श्री कन्यका परमेश्वरि
सर्व जीवशुभङ्करि श्रीवासवि विश्वेश्वरि ॥ १॥

प्रणव नादस्वरूपिणि घन शैलनगर निवासिनि
भक्तहृदय विहारिणि महत्त्याग मानसरक्षिणि ॥ २॥

ऋषिगणार्चित शुभमनोहर चरणयुगल सरोजिनि
चक्रराज निवासिनि बहुमन्त्रस्फुरण विराजिनि ॥ ३॥

देव किन्नर किम्पुरुष गन्धर्व यक्षोद्धारिणि
सत्यशोधक धीप्रचोदिनि कामितार्थप्रदायिनि ॥ ४॥

सर्वपातक नाशिनि निजसाधना बलवर्धिनि
दुःखदारिद्र्यादि नाशिनि ज्ञानयोगाह्लादिनि ॥ ५॥

ववविध कर्मसु मर्मभेदिनि गानकाव्य विनोदिनि
विविध सत्पथ प्रदर्शिनि ईषणत्रय हारिणि ॥ ६॥

देश काल निमित्त पुरुषार्थादि बलसंयोजिनि
योग सोपानाधिरोहण शक्तिवर्धिनि रञ्जनि ॥ ७॥

त्याग प्रेम विरागिणि मुक्तिमार्ग प्रकाशिनि
कार्य कारण चक्रवर्तिनि मरणभीति निवारिणि ॥ ८॥

वासवि “नटभैरवि” हे सर्वजीवशुभङ्करि
भैरवि मां पाहि त्राहि भक्तचित्तप्रियङ्करि ॥ ९॥

ज्ञान विज्ञानात्मकामृत हृदय गीतास्वादिनि
दिव्य गीतसुधावनि शुभ कामवर्धिनि निर्गुणि ॥ १०॥

## २१ राग कीरवाणि

कन्यका परमेश्वरि परदेवते
रक्ष मां सदा भक्तिसुमार्चिते ॥ पल्लवि॥

ललिता व्रताचरण पूर्वे त्वं बालिके
सर्वाभरण दुकूलान्विते पीठे स्थिते
सर्वजनसम्मुखे बहु देविरूपधरि
आश्चर्यवद्दृष्ट्वा सर्वे मूकाः ॥ १॥

कुसुमाम्ब कुसुमार्य भयदूरिणि
भास्कराचार्यस्तुत महिमावतारिणि
अहिंसा सत्पथगामिनि “कीरवाणि”
नव्यपथ प्रदर्शिनि गीतसुधावनि कीरपाणि ॥ २॥

विरूपाक्षेण सह बाल्ये क्रीडानुरक्ते
विद्यार्जने गुरुप्राज्ञ स्तब्धतासक्ते

कुसुमदम्पति हृदयस्पर्शि वाग्वर्षिणि
रक्ष मां पेनुगोण्डपुर जनोल्लासिनि ॥ ३॥

## २२ राग खरहरप्रिय

सुविमल चिद्गगने निरुत विराजिते
अनलपीठ स्थिते कुसुमार्य सञ्जाते ॥ पल्लवि॥

जन्मजन्मान्तर कृत पुण्यफल दायिनि
योगभ्रष्ठ साधक शीघ्रोद्धारिणि
तन्मयतान्तर्मोद संवाहनि
“खरहरप्रिय” रामरूप कृष्णभगिनि ॥ १॥

परतत्त्व प्रकाशिनि गीतसुधाकर्षिणि
व्यष्टि समष्टि भेधाभेधोल्लासिनि
त्यागसिंहासनेश्वरि सुचरिते
कन्यका माते मामुद्धर पुनीते ॥ २॥

## २३ राग गौरिमनोहरि

स्तव पुष्पयागं करिष्ये वासवाम्बिके
सुप्रीता भव आह्लादचन्द्रिके ।
नवदुर्गास्वरूपिणि गीतसुधा तरङ्गिणि
अष्टादशभुजे त्वं पराम्बिके ॥ १॥

शैलपुत्रीति प्रथमरूपिणि वृषभवाहनि बालचन्द्रशेखरे
सति शिवसति हैमवति त्रिशूलकमलधरे उपासिते
मूलाधारे ॥ १॥

ब्रह्मचारिणीति द्वितीयरूपिणि जपमाला कमण्डलधारिणि
पूर्ण तेजस्विनि निरुपम तपस्विनि स्वाधिष्ठानार्चिते
सिद्धिदायिनि ॥ २॥

चन्द्रघण्टेति तृतीयरूपणि दशभुजे नानायुधधारिणि
घण्टाकार बालशशिशेखरे सिंहवाहिनि मणिपूरवासिनि ॥ ३॥

कूष्माण्डेति चतुर्थरूपिणि ब्रह्माण्डसृष्टि क्रीडाविनोदिनि
अष्टभुजे रविमण्डलवासिनि आदि व्याधि हारिणि
अनाहतनिवासिनि ॥ ४॥

स्कन्दमातेति पञ्चमरूपिणि ममताङ्कस्थित षण्मुखजननि
चतुर्भुजे पद्मासने सिंहवाहिनि विशुद्धचक्रनिवासिनि ॥ ५॥

कात्यायनीति षष्टरूपधारिणि कात्यायन महर्षिनन्दिनि
चतुर्भुजे सुवर्णवर्णे सिंहवाहिनि आज्ञाचक्रवासिनि ॥ ६॥

कालरात्रीति सप्तमरूप धारिणि भूतप्रेतभयङ्करि
चतुर्भुजे कृष्णे गार्धभारूढे सहस्रारपूजिते शुभङ्करि ॥ ७॥

महागौरीति अष्टमरूपिणि वृषभारूढे श्वेताम्बरि
आश्वयुजाष्टमि पूजाप्रीते चतुर्भुजे “गौरिमनोहरि” ॥ ८॥

सिद्धिदात्रीति नवमरूपिणि अष्टसिद्धिदायिनि शिवार्धाङ्गिनि
आश्वयुज नवमिसेविते चतुर्भुजे केसरिवाहनि ॥ ९॥

एतानि देवी नवरूपाणि नवरात्र्याराधन भक्तिमहोत्सवे
पूजितानि यच्छन्ति भक्ति ज्ञान वैराग्यादि मोक्षसम्पदानि ।
ॐ तत्सत् ।

## २४ रागं वरुणप्रिय

श्री वासवीमाता कुसुमाम्ब सञ्जाता
रक्षतु मां लावण्य विद्युल्लता ॥ पल्लवि॥

बहुरूप धारिणि बहुशक्ति रूपिणि
बहुमन्त्र जननी बहुतन्त्रकारिणि
गौरव बालिकामणी गीतसुधावनी
“वरुणप्रिय” रागरञ्जिनी रक्षतु माम् ।
पालयतु माम् ॥ १॥

कामेश्वरी महावज्रेश्वरी
कुलसुन्दरी त्रिपुरसुन्दरी
भगमालिनी ज्वालामालिनी
नीलपताका वह्निवासिनी रक्षतु मां

पालयतु माम् ॥ २॥

नित्यक्लिन्ना भेरुण्डा नित्या
सर्वमङ्गला विजया चित्रा
शिवदूती त्वरिता इत्याराधिता
षोडशनित्यास्वरूपिणी रक्षतु मां
पालयतु माम् ॥ ३॥

## ५ शुद्ध मध्यम बाणचक्र

## २५ राग माररञ्जिनि

वासवि त्वमेव प्रातःस्मरणीये
कन्यके त्वं सर्वकालाराधनीये ॥ पल्ववि ॥

अम्बिके सर्वजनपूजनीये
सात्विके सर्व देशोपासनीये
पुत्रकामेष्टियाग फलजन्ये
विरूपाक्ष भगिनि आदर्शकन्ये ॥ १॥

“माररञ्जिनि” रतिपतिभस्मजात-
भण्डासुरांशज गन्धर्वराज-
चित्रकण्ठेन मोहिते कीर्तिकन्ये
विष्णुवर्धनमर्दिनि गीतसुधाराध्ये ॥ २॥

## २६ राग चारुकेशि

“चारुकेशि” कन्यका परमेश्वरि
कृश्णकेशि नवरत्नखचित पीठाधीश्वरि ॥ पल्लवि॥

माणिक्य विद्रुम गोमेध वोढूर्य खचितानि
दशाङ्गुलीयानि ताटङ्कयुगलानि कण्ठहाराणि
धारयित्वासि अनुपम लावण्यवति सौन्दर्यवति
मम द्विनेत्राभ्यां द्रष्टुं कथं शक्तोऽस्मि सुमति ॥ १॥

भक्तिवनरुह जाजी चम्पक पुन्नागसुम मालिनि
पल्लवपाणि पतितपावनि पन्नगेन्द्रशयन भगिनि
षड्रसयुत भक्ष्य भोज्य लेह्य चोष्याणि
प्रतिगृह्यतां हे देवि गीतसुधाकर्षिणि ॥ २॥

## २७ राग सरसाङ्गि

स्वप्नसदृश जाग्रदवस्थे कथमहं मोहग्रस्तं
स्वप्नसदृश दृश्यविश्वे कथमहं शोकत्रस्तम् ॥ पल्लवि॥

अहं जानामि मायादेवि त्वमेव महामान्त्रिके
व्याधिजराबद्धोऽहं संसार जलार्णव नाविके
अहं तव पुत्रोऽस्मि भक्तोऽस्मि सर्वजीवात्मिके
कथं दृष्ट्वा मम दैन्यं हर्षितासि दयाचन्द्रिके ॥ १॥

लाभनष्ट सौख्यदुःख जयापजय भेदं कुत्र
योग भोग रोग त्याग विरागभेदं कुत्र
स्वप्नकाल मात्रवेद्यं सर्वानुभवं साध्यं
“सरसाङ्गि” जाग्रतस्य सर्वमेवमेक मनृतम् ॥ २॥

## २८ राग हरिकाम्बोजि

देहि मे भक्ति भिक्षां कल्पवल्लि
श्री वासवी कन्यके अमृतवल्लि ॥ पल्लवि॥

बहुजन्म कृतपाप विपिन दहनकरि
बहुकाल कृतयोग सेवाफलकरि
बहुविषय मोहदाह निवारिणि
बहुविदोपासिते गीतसुधामोदिनि ॥ १॥

चिन्तापीडान्धकार सुदूरिणि
चिन्तनस्वरूपिणि सद्भक्तिपोषिणि
“हरिकाम्बोजि” सुराग तरङ्गिणि
सर्वजीव ज्ञानयात्रा सन्तोषिणि ॥ २॥

## २९ राग शङ्कराभरणम्

नादवीणावादन निर्मग्नहृदये
अनाहताहत नादरञ्जनि मोदाश्रये जयजय ॥ पल्लवि॥

शुकवाणि लीलाशुकपाणि विदुषीमणि जयजय
गीतसुधा वनविहारिणि स्वरलोकसञ्चारिणि माते
सुमार्पित सद्भक्ति रागरत्नहार विराजिनि जयजय ॥ १॥

परा पश्यन्ती मध्यमा वैखरी वाग्रूपिणी जयजय
साहित्य सङ्गीत पीयूष रसास्वादिनि वेदवाणि जयजय दिव्यगुणराजिते ।
शब्दार्थसंयुत लेखन वचन वाहिनि हंसगामिनि जयजय ॥ २॥

स.रि.ग.म.प.द.नीति सप्तस्वर नवविध संयोजनि जयजय
विशिष्ट स्वरविन्यासोदितानन्त रागतानालापिनि जयझय
द्वादश चक्र जनकराग महासाम्राज्य स्थापिनि गानयोगिनि
औडव षाडव वक्रराग सरोवर रसविहार रागिणि जयजय ॥ ३॥

इन्दु नेत्राग्नि वेद बाण ऋतु ऋषि वसु जयजय लोकमाते
ब्रह्म दिशि रूद्रादित्येति द्विसप्ततिः मेलकर्तराग ग्राम जयजय
“धीर शङ्कराभरण” वज्रकवचधारिणि वीररमणि जयजय ॥ ४॥

द्विसप्ततिः काव्य गीतसुधावाहिनि भवतारिणि जयजय
श्री कन्यका परमेश्वरि आत्मबलिदानकङ्कणधरि मनोहरि ॥ ५॥

स... स... सर्वजीवविकासिनि सङ्कर्षिणि बहुपराक्
रि... रि... रिपुसंहारिणि रिष्टसुदूरिणि बहुपराक्
ग... ग... गमक चमक काव्यलास्याह्लदिनि बहुपराक्
म... म... मदनशरच्छेदिनि जगन्मोहिनि बहूपराक्
प... प... पामरोद्धारिणि परञ्ज्योतिस्वरूपिणि बहुपराक्
द... द... दम शम तितिक्षोपरति चोदिनि बहुपराक्
नि... नि... निगमागम गीता स्मृति शास्त्र शरीरिणि बहुपराक् ।
जय अम्बे जगदम्बे कन्यकाम्बे बहुपराक्

राग... मध्यमावति
दयामयि त्वां समीक्ष्य समीक्ष्य नाहमस्मि
सुधामयि त्वां सामीप्य सामीप्य दासोऽहमस्मि

कृपामयि त्वां विदित्वा विदित्वा सोऽहमस्मि
चिन्मयि त्वमेवाहं अहं त्वमेव अहं ब्रह्मास्मि ॥

एतदस्तु ममानुभवं हे विश्वमाते
एतदस्तु सर्वस्यानुभवं हे मुक्तिदाते ॥

ओं शान्तिः शान्तिः शान्तिः ॥

## ३० राग नागानन्दिनि

सौम्यरूपिणि शिष्टरक्षिणि कन्यका परमेश्वरि
घोररूपिणि दुष्टशिक्षिणि रक्ष मां विश्वरूपधरि ॥ पल्लवि॥

सच्चारित्र्य सौमनस्य सद्धर्मनिकेतने
सदाचार सद्विचार सद्भावनासदने
सुगुणरत्नाकरि सर्वजीव शुभङ्करि
सर्वशक्त्यायुधधरि वरदाभयकरि ॥ १॥

चिक्षुरान्धक धूम्रलोचन करालोद्धतध्वंसिनि
चामर भाष्कल ताम्रासुरोदग्रादि दैत्यसूदनि
महिषासुर शिरच्छेदिनि दिव्यतेजस्विनि
रक्तबीजासुर रक्तपानोद्विग्न विलासिनि ॥ २॥

चण्डमुण्डासुर प्राणहारिणि चामुण्डेश्वरि हितकरि
शुम्भनिशुम्भ बलदर्पदमनि शतृवीर भयङ्करि
कौशिकी कन्यके कालिके रक्ष मां भद्रकालिके
विन्ध्यवसिनि विजयदुर्गे दुर्गे संरक्ष पराम्बिके ॥ ३।
नूतनाद्भुत शान्त्यहिंसा त्यागयुत समरदर्शिनि
त्राहि मां सुचित्र विचित्र सङ्घर्षणतन्त्र शालिनि
पराक्रमि कामवश क्रोधवश निरङ्कुश चक्रवर्ति-
विष्णुवर्धन मर्दिनि विमोचनि “नागानन्दिनि” ॥ ४॥

ललितापरमेश्वरि त्वमेव अखिलाण्ड जनयित्रि
कन्याकुमारि त्वमेव मम प्राणदात्रि ज्ञानदात्रि
हे कन्यका परमेश्वरि समाधिऋषि वरदात्रि
त्वमेव सत्यज्ञानानन्त रूपिणि गीतसुधाभिनेत्रि मम ॥ ५॥

## ६ शुद्ध मध्यम ऋतुचक्र

### ३१ राग यागप्रिय

श्रीमद्भागवत कीर्तिते वासवि
“यागप्रिय” कुसुमार्य सञ्जाते देवि ॥ पल्लवि॥

वैष्णवी माधवीति जपसंप्रीते
नारायणी ईशानीति नामगानस्तुते
दुर्गा काली भद्रेतिनाम संस्तुते
कुमुदा शारदा कन्येतिसमर्चिते ॥ १॥

चण्डिका कृष्णेति वर्णिते सुखदाते
विजया मायेति सुकीर्तिते मानिते
चतुर्दश नाम मुक्ताहार शोभिते
चतुर्दश भुवनाश्रिते गीतसुधानुते ॥ २॥

### ३२ राग रागवर्धिनि

श्रीकन्यका माते अग्निपद्म पीठस्थिते
वन्देऽ हं नगरेश्वरालय प्रतिष्ठिते ॥ पल्लवि॥

त्रिभुवन सम्मोहिनि शुकभाषिणि
त्रिमूर्ति जननि वि“राग वर्धिनि”
वन्देऽहं दिव्यस्फुरण सौधामिनि
विदुषीमणि गीतसुधाह्लादिनि ॥ १॥

अष्टादश नगराधीश सञ्जाते
अष्टैश्वर्यदाते हे मन्दस्मिते
अष्टमदवारिणि भक्तिभावोद्दीपिनि
अष्टसात्विक भावविकार कारिणि ॥ २॥

## ३३ राग गाङ्गेयभूषणि

नाहं शक्नोमि कर्तुं दीर्घ ध्यानयोगं
तव गुणमहिमारतिरेव मम मधुरयोगम् ॥ पल्लवि॥

बहुद्रव्य क्रियामय तवार्चने न मे हर्षं
देहेन्द्रिय चलन कलापमय नमने न मे हर्षं
तव भावमय मन्त्रयोगे मम मानसं तुष्यति
तव लीलावर्णन स्रोते मम हृदयं लास्यति ॥ १॥

पुलकित तनुमनहृदयेषु त्वमेव सौधामिनी
परतत्त्वासने त्वमेव साधनप्रोल्लासिनी
मनोखिन्नतापहारिणी गीतसुधावनि
मनीषिणि हे वासवि “गाङ्गेयभूषणि” ॥ २॥

## ३४ राग वागधीश्वरि

कुसुमार्य तनये कुसुमहृदये
सन्निधिं कुरु मम नत हृदये ॥ पल्लवि॥

आगमशास्त्राधारे निगम सारे
भास्कराचार्य विद्वत्साकारे
विष्णुवर्धन नृपसूदनचतुरे ।
विष्णुसोदरि श्रीकरि भक्त्याधारे ॥ १॥

नानाभरणधरि “वागधीश्वरि”
नलिनकुड्मल शुकधरि शुभकरि
आर्यवैश्य वंशाब्धि सञ्जाते
अहिंसाव्रते गीतसुधा तोषिते ॥ २॥

## ३५ राग शूलिनि

विराट् विश्वरूप प्रदर्शिनि भूनभोव्यापिनि
श्रीमद्कन्यका परमेश्वरि नमस्ते नमस्ते ब्रह्मरूपिणि ॥ पल्लवि॥

पश्यामि कथं तव विश्वरूपमिदं चराचरमयं

तेजोमयमत्यद्भुतं अलौकिकं अभूतपूर्वं
अनाद्यनन्तरूपिणि सर्वभूतान्तर्यामिनि
अनेक नदीसागर शैल वन सस्यसङ्कुलशोभिनि ॥ १॥

अनेक वदन नयन बाहूदर नलिनचरण शोभिनि
अनेक शस्त्र प्रहरणधारिणि दिनकर शशाङ्कलोचनि
सरसिजनाभ सरसिजोद्भव सदाशिव त्रिमूर्तिमाते
सरसिजनाभसति सरसिजोद्भवसति भवसतिमाते ॥ २॥

त्वं भूर्भुवस्सुवर्लोकत्रय सर्वदा संरक्षिणि
महर्लोक जनोलोक तपोलोक सत्यलोकस्वामिनि
अतलवितलसुतलतलातल रसातल महातल पाताल
व्यापिनि अण्डज स्वेदजोद्भिज जरायुजोद्भव जीवसङ्कुलपालिनि ॥ ३॥

रविकोटिदीप्तियुते आपादतलमस्तक लावण्ययुते
नागरुद्रादित्य यक्षगन्धर्व सिद्धसाध्यासुरवृन्द वन्दिते
अण्डपिण्ड ब्रह्माण्ड भाण्डोदरि महाभयङ्करि नमस्ते
प्रसन्ना भव श्रीकरि सौन्दर्यनिधीश्वरि गीतसुधाकरि ॥ ४॥

“शूलिनि”शङ्खिनि चक्रिणि गदिनि घण्टिनि वारुणि
सुरवैरिगणध्वंसिनि अष्टदिग्पालकवृन्दनियन्त्रिणि
ब्रह्मकुण्डसुक्षेत्रे चतुरुत्तरशत होमकुण्डमध्ये
आत्मत्याग महायज्ञकारिणि गोलोक गामिनि ॥ ५॥

## ३६ राग चलनाट

गुह्यतमे विमले पालय मां दीनं
गुरोरङ्घ्रि कमले मम चित्तमस्तु लीनम्म् ॥ पल्लवि॥

अन्धकारेऽस्मिन् गुहे निराश्रितोऽस्मि
अहङ्कारे जीवयात्रे बन्धितोऽस्मि
ममकारे जीवनयात्रे मोहितोऽस्मि
देहात्म वाहने कर्मचक्रे भ्रमितोऽस्मि ॥ १॥

प्रति सूर्योदये जराक्रमणमस्ति
प्रति चन्द्रोदये निद्रापरवशतास्ति

सनातना “चल नाटक” रङ्ग विश्वसाक्षिणि
विनूतन समरव्रते गीतसुधापावनि ॥ २॥

## ७ प्रति मध्यम ऋषिचक्र

## ३७ राग सालग

राजयोग सिंहासनाधीश्वरि संवित्सागरि
श्री कन्यका परमेश्वरि माधव सहोदरि ॥ पल्लवि॥

शब्द माध्यमेन सुश्रुते दशनादरूपिणि
प्राण माद्यमेन स्पर्शिते दशप्राणरूपिणि
ज्योतिर्माद्यमेन दर्शिते ज्योतिरग्निरूपिणि
शब्द स्पर्श रूप रस गन्धेति ब्रह्मरश्मि रूपिणि ॥ १॥

भ्रान्ति “सालग” भेदनशक्त सुलभदृश्ये
क्रान्ति गीतसुधापान निष्ठ सुलभवश्ये
अणिमा महिमा प्राप्ति प्राकाम्य सिद्धीश्वरि
लघिमा गरिमा ईशत्व वशित्व सिद्धेश्वरि ॥ २॥

## ३८ राग जलार्णव

मन्त्रशरीरिणि परब्रह्मरूपिणि
कर्तृ भावविकर्षिणि भोक्तृभाव दूरिणि ॥ पल्लवि॥

ह कारि त्वं स्थूलदेहे वैश्वानररूपिणि
र कारि त्वं सूक्ष्मदेहे तैजसरूपिणि
ई कारि त्वं कारणदेहे प्राज्ञरूपिणि
ह्रीङ्कारि त्वं तुरीये परब्रह्म रूपिणि ॥ १॥

“जलार्णव” त्रयवेष्टित भारतावनि पावनि
सृजन स्फुरण सौधामिनि गीतसुधाह्लादिनि
भक्ति भुक्तिप्रदायिनि सर्वपुरुषार्थप्रदे
भवतारिणि मनो नैर्मल्यप्रद योगबलवरदे ॥ २॥

## ३९ राग झालवरालि

कुरु मम हृदयं सद्भक्तिसुधामयं
तव हृदयं सर्वजीवेषु दयामयम् ॥ पल्लवि॥

धीरोदात्त रमणि लोकमातारूपिणि
मन्त्रमुग्धोपम प्रजानुरागिणि रञ्जनि
समानाधिक रहिते क्षमात्याग समन्विते
“झालवराली”वाहं कुरु मम विमोचनम् ॥ १॥

कौसुम्भिकुसुमश्रेष्ठि कीर्तिवर्धिनि
विरूपाक्ष वात्सल्यसरसि विनोदिनि
कृतयुग त्रेतायुग द्वापरयुगाधीश्वरि
कलियुगावतारिणि गीतसुधाकरि ॥ २।

## ४० राग नवनीत

अनाहत चक्रनिलये वासवि सुकन्ये
अनाहत नादवलये महाधन्ये ॥ पल्लवि॥

समग्र सम्पदेश्वरि समग्र ज्ञानाधीश्वरि
समग्र यशो साम्राज्य मोदकरि
समग्र वैराग्य सिंहासनेश्वरि
समग्र धर्मैश्वर्य निधीश्वरि ॥ १॥

अनूह्य द्युतिमय ब्रह्माण्डालये
अनुपमाद्भुत चरिते योगमाये
वन्देऽहं नतजनत्राते श्रीमाते
गीतसुधाप्रीते विद्यादाते ॥ २॥

उद्यद्रवि सहस्र प्रकाशयुते
शब्दब्रह्म रूपिणि द्वादशदलसहिते
अपार करुणार्णवे “नवनीत”हृदये
असीम योगशक्तियुते स्फुरणोदये ॥ ३॥

## ४१ राग पावनि

सर्वबीज मन्त्रात्मिके वासवाम्बिके
सर्वमन्त्र जाप्यतुष्टे भुवनाम्बिके ॥ पल्लवि॥

ओं ह्रीं ऐं क्लीं सौः वं नमः
श्री वासवि कन्यका परमेश्वरि देव्यै स्वाहा
इति गायत्री मन्त्र सञ्ज्ञिका मन्त्रराजजननि
आत्मशक्ति वर्धिन शान्ति सौख्य दायिनि हितवादिनि ॥ १॥

चित्तचाञ्चल्य दूरिणि शरणागत “पावनि”
विषयाकर्षण दौर्बल्यदूरिणि विदुषीमणि
ज्ञातृ ज्ञान ज्ञेयरूपिणि समदर्शिनि
अवस्थात्रय साक्षिणि विनतगीतसुधावनि ॥ २॥

## ४२ राग रघुप्रिय

गोदावरी सलिल विहार विनोदिनि
श्री कन्यकापरमेश्वरि कुसुमगुप्तनन्दिनि ॥ पल्लवि॥

सुषुम्ना नाडी सञ्चारिणि वरदे
रोमाञ्चन कम्पनकारिणि मोददे
नादबिन्दुकलातीते गीतसुधे
वेदनादोपासिते आत्मविदे ॥ १॥

कारुण्य पीयूष तरङ्गिणि जननि
कर्मपरिपाक साक्षिणि श्रितावनि
धर्मरक्षणार्थं भेदनाशिनि
कर्मकौशलार्थं भेदपालिनि ॥ २॥

“रघुप्रिय” कुलतिलक रामरूपि कृष्णभगिनि
सोऽहं भावध्यान निरत श्वासनियन्त्रिणि
दासोऽहं भावविनम्र श्वाससञ्चालिनि
निरवधि सुखभाग्यं देहि मे क्षिप्रवरदायिनि ॥ ३॥

# ८ प्रति मध्यम वसुचक्र

## ४३ राग गवाम्बोधि

“श्री” माते वासवाम्बे न जाने न मन्त्रं न तन्त्रं
जाने न ध्यानं नावाहनं न भक्तिस्तोत्रं
“क ”लिमल स्निग्धोऽहं ममानन्त दुरितानि दह दह
“न्य ”क्भाव जयापजय यशापयशेषु तितिक्षां प्रद
“का ”पुरुषतां त्यक्त्वाहमस्मि गुरुदर्शित पथगामिनी
“प ”रमसुखप्रदमेव तव दिव्य गुण चिन्तामणि ॥ १॥

“र” म्ये सौम्ये श्रुतिज्ञानगम्ये मां त्यक्त्वा मा गच्छ
“मे ”धाशक्तिं ब्रह्मवर्चसं कृपया मे यच्छ प्रयच्छ
“श्व ”सनबलरूपेण जीवरक्षाकरि त्वरितमागच्छ
“रि”पुसमूह ध्वंसिनि गीतसुधावनि मां रक्ष संरक्ष ॥ २॥

“गवाम्भोधि” वणिक्कुलोद्भवे मां संरक्ष
गोमाता सेवाभक्ति सहिते श्रीमाते रक्ष
वैश्यकुलाचार्य भास्कर गुरुवचनपालिनि
क्षत्रकुलाचार्य धौम्य ऋषि वन्द्यार्चावतारिणि ॥ ३॥

श्री ..क..न्य..का..प..र..मे..श्व..रि..

## ४४ राग भवप्रिय

वासवि वरदा “भव प्रिय” भाषिणि
वामनयनि वन्देऽहं त्वां फणिवेणि ॥ पल्लवि॥

च्यवन ऋषि शिष्य धर्मनन्दनगुप्त स्तुते
आदिशेष वर्णिते अपूर्व महिमायुते
भक्तियोगि गण वेष्टिते त्यागोपेत कर्मार्चिते
भास्कराचार्य वर्णित लीलाप्रदर्शिते ॥ १॥

अविद्याऽस्मिता राग द्वेषाभिनिवेशेति
पञ्चक्लेश बाधा वारिणि विरागिणि
ऊरुजान्वय पोषिणि गोसेवानन्दिनि

गीतसुधा तोषिणि स्वसुखदायिनि ॥ २॥

## ४५ राग शुभपन्तुवरालि

मम प्राणप्रयाणकाले कथं तव ध्यानं हे वासवि
मम हृन्मन्दिर निवासिनी भव कृपया अद्यैव हे परदेवि ॥ पल्लवि॥

त्रिगुणात्मिक संस्कारसञ्चये विवेचना शून्योऽस्मि
मम जन्मजन्म कर्मधर्म रहस्यविज्ञान रहितोऽस्मि
सगुण निर्गुण मर्मवेत्ते अन्तर्मुखत्वप्रियोऽसि
उत्तरायण दक्षिणायन गमनरहस्य बोधिनि ॥ १॥

नेच्छामि परमपदं माते नेच्छामि जन्मराहित्यं
वाञ्छयामि तव महिमान्वित चारुचरण सान्निध्यं
मन्दस्मित सम्मोहक वदने चारुतेजोनयने
"शुभपन्तुवरालि" गमने गीतसुधाश्रित सौशील्यसदने ॥ २॥

## ४६ राग षड्विधमार्गिणि

दीनोऽस्मि मायाधीनोऽस्मि वासवि
माये त्वं निर्माये संरक्ष परदेवि ॥ पल्लवि॥

कर्मचक्र सञ्चालिनि भक्तिं मे प्रयच्छ
क्षेत्र क्षेत्रज्ञ रूपिणि विवेकं प्रयच्छ
कुसुमार्य नन्दिनि विरूपाक्ष भगिनि
सारसदल नयनि सर्वलोक साक्षिणि ॥ १॥

चराचरात्मक विश्वान्तर्यामिनि
ब्रह्म निर्वाणरूपिणि त्रिदेवि जननि
नव रस भक्ति गीतसुधा स्वादिनि
नव नवोन्मेष शालिनि रञ्जनि ॥ २॥

शब्द ज्योति प्राणद्वारा अन्वेषिते
कर्म भक्ति ज्ञान द्वारा सद्दर्शिते
सर्वपथ प्रदर्शिनि "षड्विधमार्गिणि"
हृत्पुण्डरीक निलये प्रत्यगात्म रूपिणि ॥ ३॥

## ४७ राग सुवर्णाङ्गि

मम हृदये ज्ञानज्योतिं स्थापय
वासवाम्बिके मां परिपालय ॥ पल्लवि॥

सर्वपुण्य तीर्थात्मिके कन्यके
सर्वभूतात्मिके त्रिगुणात्मिके
अपरोक्ष ज्ञानोदये “सुवर्णाङ्गि”
आकर्षण विकर्षणमये शुभाङ्गि ॥ १॥

पराविद्यालये सर्वधर्मसमन्वये
पराशक्ति योगमाये गीतसुधाश्रये
मानसाश्व वेगनियन्त्रण बोधिनि
विश्व तैजस प्राज्ञ रूपिणि साक्षिणि ॥ २॥

नामरूपाकार दिग्देश कालविवर्जिते
गुणकर्म वयोजाति लिङ्गभेध रहिते
चिदग्नि कुण्डसम्भूते सुरेन्द्रसन्नुते
प्रणवनादमय जगत्संप्रीते ॥ ३॥

## ४८ राग दिव्यमणि

समस्त विश्वविनुते वासविमाते
सर्वविद्या सारामृते सर्वाधिदेवते ॥ पल्लवि॥

तव महिमागानेन विना कुतो मह्यं सुखं
तव चरितामृतेन विना कुतो जन्मसार्थक्यं
भवतु मम कृतिहर्षिता गीतसुधात्राते
तव कृपावर्षमस्तु वैश्याब्धि सञ्जाते ॥ १॥

नित्यार्चिते विकल्प विवर्जिते
अद्वैत भावशोभिते परदेवते
“दिव्यमणि”हार भूषिते गुरुस्तुते
ब्रह्मतेजो विराजिते गुणसुमार्चिते ॥ २॥

# ९ प्रति मध्यम ब्रह्मचक्र

## ४९ राग धवलाम्बरि

शुकपाणि हे वासवि श्रीमाते
कोकिलवाणि मामव प्राणदाते ॥ पल्लवि॥

अष्टादश नगरस्वामि ज्ञानवर्धिनि
तव जननीजनक धैर्य स्थैर्य स्थापिनि
सर्वेषां हृद्दौर्बल्य निवारिणि
घनशैलपुरे अपूर्वकन्यामणि ॥ १॥

सौन्दर्यनिधीश्वरि “धवलाम्बरि”
ध्यानयोगगोचरि पावनकरि
गीतसुधाधरि अभयङ्करि
चतुर्दश भुवनैकाधीश्वरि ॥ २॥

भूलोक भुवर्लोक सुवर्लोक-
महर्लोक जनोलोक तपोलोक-
सत्यलोक स्वामिनि सर्वलोकपालिनि
इच्छाशक्ति ज्ञानशक्ति क्रियाशक्ति प्रसारिणि ॥ ३॥

## ५० राग नामनारायणि

भवतु सुप्रीता आबालगोप नित्याश्रिता
अहिंसा शान्ति रणमहोद्यमव्रता वासवि माता ॥ पल्लवि॥

वैशाख शुद्धदशमी भृगुवासर जन्मधारिणी
प्राभातस गोत्रोध्भवा पेनुगोण्डाधीश नन्दिनी
पुनर्वसु नक्षत्रसहित जन्मलग्न सम्भूता
विरूपाक्ष सहजाता भवतु संप्रीता ॥ १॥

अनुपम लावण्य सौन्दर्य माधुर्ययुक्ता
निरतिशय ज्ञान कला विद्या विज्ञानसंयुक्ता
कन्यका परमेश्वरी “नाम नारायणि ”ननन्दा

सर्व देशेषु सर्वकालेषु भवतु सुप्रीता सर्वदा ॥ २॥

सर्वोत्तम यन्त्र तन्त्र मन्त्र रहस्यशक्ति जननि
सर्वोत्तुङ्ग तरङ्गित चैतन्य लास्य वैभवोल्लासिनि
सर्वसम्पोषिणि भास्कराचार्य गुरुवरकीर्तिवर्धिनी
सर्वोद्धारिणि सर्वनियन्त्रिणि गीतसुधातरङ्गिणि ॥ ३॥

## ५१ राग कामवर्धिनि

पालय मां सदा मीनलोचनि
कृपया सदा श्री वासवि जननि ॥ पल्लवि॥

अमृतसाराभिवर्षिणि अम्बे
धर्मयुत "कामवर्धिनि" सुप्रभे
षट्चक्रोपरि शोभिनि निरामये
षड्वैरि दमनि हे दिव्याश्रये ॥ १॥

कर्माकर्मविकर्म भेदबोधिनि
कर्मसङ्ग हारिणि गीतसुधारागिणि
धर्मार्थ काम मोक्ष फलप्रदे
धर्माधर्मातीत मोक्षसंप्रदे ॥ २॥

## ५२ राग रामप्रिय

आत्मज्ञान प्रदायिनि वासवी वेदमाते
आत्मा"रामप्रिय" महर्षि वृन्दाश्रिते ॥ पल्लवि॥

साधकान्तःकरण चतुष्टय मथनि
पञ्चवृत्ति तरङ्गिणि सर्व साक्षिणि
योगसाधकात्मशक्ति संवर्धिनि
रागानुरागोद्दीपिनि विरागिणि ॥ १॥

मनोकरण निग्रह बलदे निरञ्जनि
बुद्धि करण दोषहारिणि मोदिनि
अहम्भाव नाशिनि दास्यभक्तिरञ्जनि
चित्तकरणे सुसंस्कार प्रकाशिनि ॥ २॥

प्रमाण वृत्तिमुखेन विश्व प्रदर्शिनि
विपर्यय वृत्तिद्वारा मायासञ्चालिनि
विकल्प वृत्ति माध्यमेन सृजन बलपालिनि
स्मृतिवृत्ति रुपेण अनुभव सञ्जीविनि ॥ ३॥

आनन्दमय कोशवासिनि पर-
मानन्द दायिनि परन्धाम वासिनि
वर्णनातीत रूपिणि जनरञ्जनि
शुद्धवृत्ति रक्षिणि गीतसुधा पावनि ॥ ४॥

## ५३ राग गमनश्रम

त्वां स्मरामि आर्षधर्म पालन रक्षण तत्परे
तत्त्वसारे तत्त्वाकारे तत्त्वाधारे सुरुचिरे ॥ पल्लवि॥

भण्डासुरांशज विष्णुवर्धन नराधिप मर्दिनि
कुबेरांशज वैश्यवंशोद्धारिणि धीररमणि
रक्ष मां काम क्रोधलोभादि वैरिनाशिनि
अष्टविध मद मोहशोकाम्बुनिधि शोषिणि ॥ १॥

वीरकेसरि परिवर्तिनि वीरमुष्टि कुलकृपाकरि
मल्हरात्म बलिदानवरदे मैलारकुल रक्षाकरि
लाभश्रेष्टि वीरकङ्कण प्रदे सद्गतिदायिनि
काम्यार्थ “गमनश्रम” हारिणि गीतसुधावाहिनि ॥ २॥

## ५४ राग विश्वम्भरि

श्री विद्याधारे विद्याधरे
श्री वासवि “विश्वम्भरि” परात्परे ॥ पल्लवि॥

धर्मरक्षण तत्परे लोकोत्तरे
परिवर्तनचतुरे बिम्बादरे
भास्कराचार्य शिष्योत्तमे
भावसंशुद्धिं देहि देहि मे ॥ १॥

गुणत्रयमयि विश्वप्रेममयि
सदानन्दमयि सच्चिन्मयि
सारस कुड्मल शुककरद्वयि
सारसदल नयनि गीतसुधामयि ॥ २॥

## १० प्रति मध्यम दिशिचक्र

### ५५ राग श्यामलाङ्गि

भावयामि बालचन्द्रशेखरीं
वासवीं घनशैलनगरेश्वरीम् ॥ पल्लवि॥

त्रिदेह पालनकरीं त्रिशक्तिरूपधरीं
त्रिताप दूरीकरीं त्रिगुणखेलनकरीं
सुप्त प्रतिभोद्दीपनकरीं श्रीकरीं
भावयामि कृपासागरीं श्रीकरीम् ॥ १॥

गान काव्य चित्र शिल्प चतुरां सुरुचिरां
मनोवाचामगोचरां सुधीवरां
चतुर्वेद सारां तत्त्वाकारां
भावयामि सङ्गीतसुधाधारां श्रीकरीम् ॥ २॥

सौन्दर्य रत्नाकरीं सुजनरक्षणकरीं
सत्यानन्दकरीं “श्यामलाङ्गी” रूपधरीं
चतुर्विंशत्यक्षर मन्त्र गोचरीं
चराचरानन्दकरीं सुकुमारीम् ॥ ३॥

### ५६ राग षण्मुखप्रिय

श्रीविद्योपासक नित्याराधिते
रक्ष मां सर्वदा वासवी माते ॥ पल्लवि॥

भक्तिभावोपासिते कामितार्थ दायिनि
ज्ञानपुष्पपूजिते द्वैतभावनाशिनि
सृष्टिक्रमे अर्चिते प्रवृत्तिकारिणि

संहारक्रमे पूजिते निवृत्तिकारिणि श्रीकरीम् ॥ १॥

नवावरणमय श्रीचक्रेश्वरि
नव नव भावाङ्कुरि गीतसुधाकरि
“षण्मुखप्रिय” वाणीप्रिय श्रीप्रिय स्तुते
गन्धर्व गानसुधातरङ्गिणि मुदिते ॥ २॥

अणिमा सिद्धिस्वामिनि लघिमा सिद्धिदायिनि ।
महिमा सिद्धिकारिणि ईशित्व सिद्धिशोभिनि ।
वशित्व सिद्धिराजिनि प्रकाम्य सिद्धिधारिणि
भुक्ति सिद्धिविराजिनि इच्छासिद्धि प्रपूरिणि ।
प्राप्ति सिद्धिजयमोदिनि अष्टसिद्धिजननि

## ५७ राग सिंहेन्द्र मध्यम

समदर्शिनि सृस्टिचदुरङ्ग हर्षिणि कुसुमनन्दिनि
साधकोद्धारिणि अमोघाभ्यास स्फूर्ति दायिनि ॥ पल्लवि॥

आदिपराम्बिकावतारिणि भवतारिणि
श्रीकन्यका परमेश्वरि पालय मां शुकपाणि
मनोवाचामगोचरे काव्यचित्र चतुरे
चतुर्वेदसारे ध्यानयोगगोचरे तत्त्वाकारे ॥ १॥

पद्मशयन चक्रवर्ति निरङ्कुशत्व विरोधिनि
पुरुष“सिंहेन्द्र मध्यम” पाण्डवसखभगिनि
असीम त्यागधन वैश्यदम्पति मुक्तिदायिनि
अहिंसा दीक्षासम्बद्ध नव्यपथगामिनि ॥ २॥

विषादग्रस्त कुसुमश्रेष्ठि ज्ञानप्रबोधिनि
विष्णुवर्धन सुतराजेन्द्र विलाप सुदूरिणि
द्युत्तरशत लिङ्गप्रतिष्ठित पेनुगोण्डाधीश्वरि
राजगुरु भास्कराचार्य प्रियशिष्या रुपधरि ॥ ३॥

## ५८ राग हेमवति

मां परिवर्तयतु अप्रतिम कन्या

“हेमवति” यागजन्या कीर्तिकन्या ॥ पल्लवि॥

सुकोमलहृदया योगमाया
सर्वजीवाश्रया महामाया
अभयाप्रमेया गीतसुधालया
मां परिवर्तयतु शास्त्रविधिप्रिया ॥ १॥

गुणग्रहणाभ्यास प्रीति मूला
नटनरहित मैत्रिकरुणलोला
वन्दारुजनवत्सला निष्कला
मां परिवर्तयतु ध्यानशीला ॥ २॥

## ५९ राग धर्मवति

हे भगवति सद्गमय असतो मा
हे “धर्मवति” ज्योतिर्गमय तमसो मा ॥ पल्लवि॥

समाधि ऋषि वरदायिनि पराशक्तिरूपिणि
कुसुमाम्ब कुसुमार्य सौख्यवर्धिनि
विरूपाक्ष वात्सल्य रञ्जनि रागिणि
वणिक्कुलकन्यामणि श्रितचिन्तामणि ॥ १।
अलौकिक सुमधुर सूक्तिसंवर्षिणि
आत्मज्ञानार्थ नृत्यगानविनोदिनि
अहिंसा त्यागमय समरपथ गामिनि
भक्तिज्ञान प्रदायिनि गीतसुधावनि ॥ २॥

## ६० राग नीतिमति

वासवि माते “नीतिमति” द्युतिमति
सर्व जीव हृद्देशे तिष्ठसि चिज्ज्योति ॥ पल्लवि॥

नयनालये हे चाक्षुषज्योति
मनोनिलये हे भास्वरज्योति
बुद्धिसदने हे तैजसज्योति
ब्रह्माण्ड वलये हे परञ्ज्योति ॥ १॥

घनशैलपुराधीश्वरि वराभयकरि
अगणित विन्यासमय विश्वरूपधरि
लोक प्रदक्षिणे आशुमोद दायिनि
आत्मप्रदक्षिणे आशुमोक्षदायिनि ॥ २॥

सत्वगुण रजोगुण तमोगुण पूर्णे
गुणातीत कर्मयुक्ते आत्मरतिपूर्णे
द्वन्द्वातीते अवस्थातीते देशातीते
दिक्कालातीते सर्वातीते गीतसुधास्तुते ॥ ३॥

## ११ प्रति मध्यम रुद्रचक्र

## ६१ राग कान्तामणि

ज्ञानभक्ति माधुर्य रसवाहिनि
तवार्चनं करिष्ये वासविजननि ॥ पल्लवि॥

सुरधेनुरूपिणि मोददुग्धवर्षिणि
मनस्विनि यशस्विनि रञ्जनि
विश्वस्पन्दन रूपिणि गीतसुधावनि
सकलप्राण स्पन्दनगतिनियन्त्रिणि ॥ १॥

अरविन्द नीलोत्पल नवमल्लिका
अशोक चूतेति वैविध्यमय
मदन पञ्चशराभिमुखे क्रीडसि
असङ्गशस्त्रधारिणि “कान्तामणि” ॥ २॥

## ६२ रागं रिषभप्रिय

भजरे मानस वैश्यवंशोद्धारिणीं
वासवि कन्यामणीं विश्वमोहिनीम् ॥ पल्लवि॥

हर्षामर्षोद्वेग दूरिणीं
रागद्वेष भीत्यापहारिणीं
मदोन्मत्त दैत्यकुल भञ्जनीं

विष्णुवर्धन भूपमर्दिनीम् ॥ १॥

जीवभावार्पण प्रहर्षितां
जगदानन्दकर लीलानिरतां
विज्ञ जन ज्ञानगोष्ठि मोददां
“रिषभप्रिय” रागरत गीतसुधाम् ॥ २॥

## ६३ राग लताङ्गि

सर्वाधिष्ठात्रि कुसुमाम्बपुत्रि
वासवि दिव्यनेत्रि “लताङ्गि” शुभगात्रि ॥ पल्लवि॥

स्थावर जङ्गमात्मक विश्वजनयित्रि
सर्वजीवैक पात्राभिनेत्रि
सर्व सौख्यदुःखानुभव दात्रि
जाग्रत्स्वप्नात् उत्तिष्ठितस्य मुक्तिदात्रि ॥ १॥

शिष्ट रक्षणार्थं सौम्यरूपधरि
दुष्ट शिक्षणार्थं उग्ररूपधरि
सर्वरूप नामाकार बलगुणशालिनि
सर्वविध योगरञ्जनि गीतसुधा वाहिनि ॥ २॥

पदसेवनार्चन वन्दनात्मनिवेदन-
श्रवण कीर्तन स्मरण सख्य दास्येति
नवविध भक्तितोषिणि मम कीर्तन हर्षिणि
पराभक्त मुक्तिदायिनि सगुणनिर्गुणरूपिणि ॥ ३॥

## ६४ राग वाचस्पति

हिरण्मय कोशे आत्मतत्त्वरूपिणि शुकपाणि
ह्रीङ्कारनन्दनसञ्चारिणि वासवि शुभवाणि ॥ पल्लवि॥

परमानन्द पयोसागरि प्रशान्तचित्त वशङ्करि
परमोन्नत योगधामेश्वरि पद्मकुड्मलधरि
“वाचस्पति” इन्द्राग्नि वायु यम निरुरुति
ऋशान वरुण कुबेर दिक्पालक नियन्त्रिणि ॥ १॥

सर्वविधोत्सवार्चिते कर्मयोगि वृन्द समाश्रिते
भक्ति शक्ति सहित मुक्तिं प्रयच्छ भुक्तिदाते
अमृतस्वरूपे सर्वे सुखिनः भवन्तु
आत्म गीतसुधापाने सर्वे तुष्यन्तु ॥ २॥

## ६५ राग मेचकल्याणि

भजामि श्री कन्यका परमेश्वरीं
भवचक्रेश्वरीं श्रीचक्रेश्वरीम् ॥ पल्लवि॥

श्रीविद्योपास्यां नित्याराध्यां
श्रितपूज्यां श्रीसहित वैश्यकुलसेव्यां
सृष्टिक्रमे समर्चितां प्रवृत्तिकारिणीं
गृहस्थाश्रमप्रिय मार्गदर्शिनीम् ॥ १॥

संहारक्रमे सम्पूजितां निवृत्तिकारिणीं
संन्यासाश्रमप्रिय भक्तिसम्पद्दायिनीं
विषयविमुखत्व शक्ति संवर्धिनीं
भजामि ज्ञानविज्ञानैश्वर्य प्रसादिनीम् ॥ २॥

मधुरिपु विरिञ्चि पशुपति जननीं
सुरगण सद्भावलास्य विनोदिनीं
अहिंसा पथगामिनीं "मेचकल्याणीं"
सुप्त सुज्ञानाभिव्यक्तिकारिणीम् ॥ ३॥

चिदानन्दलहरीं गीतसुधासागरीं
ब्रह्मशक्तीश्वरीं कारुण्यमाधूरीं
परमेश्वरीं परन्धामेश्वरीं
ह्रीङ्कार बीजाक्षरीं लोकेश्वरीम् ॥ ४॥

## ६६ राग चित्राम्बरि

पूर्णसुधांशु मुखि प्रहसन्मुखि
त्राहि मां वासवि साधुजनरक्षकि ॥ पल्लवि॥

सर्वमन्त्रात्मिके सर्वयन्त्रात्मिके
सर्वतन्त्रात्मिके गीतसुधात्मिके
षोडश कलात्मिके त्रिगुणात्मिके
पञ्चमहाभूतात्मिके असुरान्तके ॥ १॥

वाराही वैष्णवी इन्द्राणी कौमारी
ब्राह्मी चामुण्डा महेश्वरीति शक्तिधरि
दिव्य सप्तमातृकास्वरूपधरि
परिपरि नामरूपधरि "चित्राम्बरि" ॥ २॥

## १२ प्रति मध्यम आदित्यचक्र

## ६७ राग सुचरित्र

धन्या सुकन्या महामान्या
पालयतु मां वैश्याब्धिकन्या ॥ पल्लवि॥

सेव्या सम्भाव्या महोपास्या
पालयतु मां पूर्णचन्द्रास्या
गुप्ता सन्तृप्ता सन्तप्ताश्रितावनी
पालयतु मां कलिमलहारिणी ॥ १॥

गोप्ता सन्दीप्ता "सुचरित्रा" सुनयनी
पालयतु मां त्रिताप वारिणी
अनाद्यनन्तरूपिणी सृष्टिखेलन रञ्जनी
पालयतु मां गीतसुधावनी ॥ २॥

## ६८ राग ज्योतिस्वरूपिणि

सात्विकान्तःकरण वासिनि प्रसीद
परं "ज्योतिस्वरूपिणि" प्रसीद ॥ पल्लवि॥

सृजनात्मिक स्फूर्ति प्रमोददे
रचनात्मक शक्ति बुद्धि प्रतिभा बलदे
काव्य शास्त्र नाट्य चित्र विनोदिनि

सङ्गीत साहित्य शिल्प ज्ञानदायिनि ॥ १॥

सर्वविद्या पारङ्गते सुश्रुते
सुज्ञान विज्ञान दीपाराधिते
अनूचान वेद वाङ्मयवेत्ते
वासवि जगन्माते गीतसुधाश्रिते ॥ २॥

## ६९ राग धातुवर्धिनि

त्वया ततमिदं विश्वं वासवि पावनि
वैविध्यमय “धातुवर्धिनि” देहवाहनि ॥ पल्लवि॥

अस्ति जायते वर्धते परिणमते
अपक्षीयते शरीरमिदं नश्यते
इति ज्ञात्वापि नित्यपदं न जानामि
गुरुमन्त्र दीक्षितोऽपि ध्यानरतिं न जानामि ॥ १॥

नवद्वारयुतपुर देहस्याभिमाने
अहर्निशं विवशोऽस्मि विषययाने
जनन मरण चक्रवर्तिनि सनातनि
भवतारिणि गीतसुधोद्धारिणि ॥ २॥

## ७० राग नासिकाभूषणि

चारुमानुष विग्रहरूपधारिणि
चारु “नासिकाभूषणि” वासवि मानिनि ॥ पल्लवि॥

त्रितनु चेतन कारिणि त्वमेवासि
त्रिमल सुदूरिणि त्वमेवासि
त्रितापसन्त्रस्त परिरक्षिणि त्वमेव
त्रिगुण लीलाविलासिनि त्वमेव ॥ १॥

अवस्थात्रय साक्षिणी का त्वया विना
मूढश्रद्धापहारिणी का त्वया विना
चिन्तामणि मन्दिरनिवासिनि त्वमेव
गीतसुधागान योगाह्लादिनि त्वमेव ॥ २॥

## ७१ राग कोसल

किं कर्तव्यमिति सम्मूढोऽस्मि
न जानामि योगं तव पदभ्रृङ्गोऽस्मि ॥ पल्लवि॥

उद्धरेदात्मना आत्मानमिति
मा त्यज मां पाहि धर्मवति
पुराकृत कर्माणि चित्तकोशे मुद्रिताः
नवभावतरङ्गाः मनोसागरे घर्षिताः ॥ १॥

अज्ञान नाशिनि भक्तोद्धारिणि
आशुपरिवर्तिनि गीतसुधा स्वामिनि
चतुर्विध संस्कार विलास साक्षिणि
आत्मशक्तिं वर्धय आत्मविद्यादायिनि ॥ २॥

उदार संस्काराः नित्यप्रकटिताः
विच्छिन्न संस्काराः अप्रकटिताः
तनु नाम संस्काराः शक्तिहीनाः
प्रसुप्त संस्काराः सुप्ताः मां विमोचय ॥ ३॥

“कोसल”नृप दौहित्ररूप गोपालसोदरि
नारीशील मर्यादा स्वातन्त्र्य रक्षाकरि
विष्णुवर्धन मोह निरङ्कुशत्व विरोधिनि
सुसंस्कार युत साम्राज्य स्थापिनि ॥ ४॥

## ७२ राग रसिकप्रिय

सर्गचक्रेश्वरि त्वमेव शरणं सर्वलोकेश्वरि
श्रीमद्कन्यका परमेश्वरि शरणं त्रिकालेश्वरि ॥ पल्लवि॥

गौरीनगरेश्वर भक्तिसागर यान मोदिनि
ब्रह्मावतारि भास्कराचार्य निष्ठापालिनि
कोनकमला जनार्दनाराधना तुष्टिसहिते
विन्ध्यवासिनीदेवी पूजानन्द निर्मग्न वनिते ॥ १॥

श्रीसूक्त विधानेन षोडशार्चन सन्तोषिणि
श्रीमहाराज्ञि श्रीवासवि श्रीमाते त्वमेव शरणं
वैश्यवंशीय जीवनमहोन्नत्य प्रकाशिनि
पूर्वज वणिक्कुलज निष्ठागरिष्ठता प्रबोधिनि ॥ २॥

वंश गोत्र प्रवर पितामहदत्त महादान-
क्षेत्राज्य दीपसङ्ख्य जपसङ्ख्य तपोस्थान-
तीर्थ तटाकेष्टदैव नित्य त्याज्यपदार्थेति
दशलिङ्गानि भास्करगुरुवर द्वारा निर्देशितानि ॥ ३॥

भूपुरयुक्त नवावरण सहित चक्रेश्वरि
चतुर्विध समैक्यताविराजिते राजेश्वरि
"रसिकप्रिय" कलाभिज्ञ प्रमोदाकर्षिणि
अष्टादश शक्तिपीठ शोभिनि गीतसुधा तरङ्गिणि ॥ ४॥

इति द्विसप्ततिः ७२ मेलकर्ता रागयुक्त वासवीदेवी भक्तिपुष्पाञ्जलिः समाप्ता ।

Composed, transliterated, and proofread (also Copyright) by
Rajeshwari Govindraj rajeswari dot govindraj at yahoo dot com
Released on Vijayadashami October 7, 2019

---

*Vasavidevi Devotional Garlands in 72 Melakarta Ragas*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*